## पत्तङ्गम् (मध्यकाष्ठ)

स्वादु पाकरसे शीतं पतङ्गं नातिशीतलम् ।
कुचन्दनं तु तिक्तं स्यात्सुगन्धि व्रणरोपणम् ।।7।।
(ध. नि. चन्दनादिवर्ग)

पतङ्गंतिक्तमधुरं वर्ण्यं पित्तकफापहम् ।।328।।
(शो. नि. चन्दनादिवर्ग)

पतङ्गंमधुरं शीतं व्रणपित्तकफापहम् ।।1431।।
(कै. नि. ओषधिवर्ग)

पतङ्गंकटुकं रूक्षमम्लं शीतं तु गौल्यकम् ।
वातपित्तज्वरघ्नं च विस्फोटोन्मादभूतहृत् ।।141।।
(रा. नि. चन्दनादिवर्ग)

पतङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्त्रनुत्।
हरिचन्दनवद्वेद्यं विशेषाद्दाहनाशम् ।।19।।
(भा. प्र. नि. कर्पूरादिवर्ग)

# पिप्पली (फलम्)

पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः।
निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः।।23।।

(सु. सू. 38)

पिप्पली कटुका स्वादुर्हिमा स्निग्धा त्रिदोषजित् ।
तृड्ज्वरोदरजन्त्वामनाशिनी च रसायनी।।74।।

(ध. नि. शतपुष्पादिवर्ग)

पिप्पली दीपनी वृष्या स्वादुपाका रसायनी।
अनुष्णा कटुका स्निग्धा वातश्लेष्महरी लघुः।।54।।
पिप्पली रेचनी हन्ति श्वासकासोदरज्वरान्।
कुष्ठप्रमेहगुल्मार्शःप्लीहशूलाममारुतान्।।55।।

(भा. प्र. नि. हरीतक्यादिवर्ग)

पिप्पली ज्वरहा वृष्या स्निग्धोष्णा कटुतिक्तका।
दीपनी मारुतश्वासकासश्लेष्मक्षयापहा।।13।।

(रा. नि. पिप्पल्यादिवर्ग)

शुष्का लघुः स्वादुपाका स्निग्धानुष्णा रसे कटुः।
कफवातहरा रुच्या सरा वृष्या रसायनी।।1166।।
दीपनी पाचनी हृद्या पित्तला श्वासकासनुत्।
निहन्ति कफगुल्मार्शो मेहप्लीहज्वरोदरान्।।1167।।
तीक्ष्णोष्णभावात् श्लेष्मघ्नी तस्माच्चैवाग्निदीपनी।
शैत्यप्रसादमाधुर्यात् पित्तं हन्ति च पिप्पली।
औष्ण्यात् सरत्वात् पाकाच्च वातस्याप्यनुलोमनी।।1168।।

(कै. नि. ओषधिवर्ग)

## प्लक्षः (फलम्)

प्लक्षः कटुः कषायश्च शीतलो रक्तपित्तजित्।
मूर्च्छाभ्रमप्रलापाश्च हरेत् प्लक्षो विशेषतः ॥75॥
(ध. नि. आम्रादिवर्ग)

क्षीरवृक्षफलं साम्लं कषायं मधुरं हिमम् ।
कफपित्तहरं रूक्षं स्तम्भनं गुरु लेखनम्॥
विबन्धाध्मानजननं परं वातप्रकोपनम् ॥498-499॥
(सो. नि.॥)

पिप्परिस्तुवरः शीतो व्रणयोनिविसर्पनुत् ।
दाहपित्तकफास्रघ्नो मेदःपित्तास्रशोफजित् ॥437॥
(कै. नि. ओषधिवर्ग)

फलं तेषां (पञ्चक्षीरीणां) तु वातकृत् ॥441॥
कषायं मधुरं साम्लं गुरुविष्टंभि पित्तजित् ॥442॥
(कै. नि. ओषधिवर्ग)

प्लक्षः कटुकषायश्च शिशिरो रक्तदोषजित् ।
मूर्च्छाभ्रमप्रलापघ्नो ह्रस्वप्लक्षो विशेषतः ॥125॥
(रा. नि. आम्रादिवर्ग)

प्लक्षः कषायः शिशिरो व्रणयोनिगदापहः ।
दाहपित्तकफास्रघ्नः शोफहा रक्तपित्तहृत् ॥12॥
(भा. प्र. नि. वटादिवर्ग)

# प्रसारिणी (पत्रम्)

वातव्याधौ - कल्पो ....प्रसारण्याम्.... पचेत् पृथक् ।।166।।
(च. चि.28)

मूत्रकृच्छ्रेजलेन नारिकेलस्य पिबेत् प्रातः प्रसारणीम् ।
मूत्रकृच्छ्रविनाशाय शर्करापातनाय च ।।6।।
(चक्रदत्त 7)

प्रसारणी गुरुस्तिक्ता सरा सन्धानकृन्मता ।
त्रिदोषशमनी वृष्या तेजः कान्तिबलप्रदा ।।279।।
(ध. नि. गुडूच्यादिवर्ग)

सारणी वातरक्तघ्नी सोष्णा वृष्या बलप्रदा।
कट्वी च लघु चक्षुष्या स्वर्या ज्वरनिशान्ध्यजित् ।।254।।
(सो. नि.।। )

प्रसारणी गुरुर्वृष्या सन्धानबलकृत्सरा।
वीर्योष्णा वातनुत्तिक्ता वातरक्तकफापहा।।
(म. पा. नि.)

प्रसारणी सरा तिक्ता वीर्योष्णा शुक्रला गुरुः ।।1061।।
व्रणसन्धानबलकृत् वातरक्तत्रिदोषहा।
(कै. नि. ओषधिवर्ग)

प्रसारणी गुरूष्णा च तिक्ता वातविनाशिनी।
अर्शःश्वयथुहन्त्री च मलविष्टम्भहारिणी ॥38॥

(रा. नि. पर्पटादिवर्ग)

प्रसारणी गुरुर्वृष्या बलसन्धानकृत्सरा।
वीर्योष्णा वातहृत्तिक्ता वातरक्तकफपहा ॥235॥

(भा. प्र. नि. गुडूच्यादिवर्ग)

प्रसारणी गुरुश्चोष्णा तिक्ता बल्या सरा मता।
भग्नसन्धानकरी कान्तिकृद्धातुवर्धका ॥
वातार्शःशोफकफहा मलस्तम्भकरी मता।
वातरक्तं त्रिदोषं च नाशयेदिति कीर्त्तिता ॥

(नि. र.)

## प्रियालः (शा.त्वक)

तिन्दुकपियालबदरखदिरकदरसप्तपर्णाश्वकर्णार्जुनासनारिमेदा
इति दशेमान्युदर्दप्रशमनानि भवन्ति ॥43॥

(च. सू. 4 )

प्रियङ्ग्वनन्ता .... तिन्दुकप्रियालबदरखदिर ....
इति कषायस्कन्धः ॥151॥

(च. वि. 8

रक्तातिसारे - शल्लकी बदरीजम्बुप्रियालाम्रार्जुनत्वचः ।
पीताः क्षीरेण मध्वाढ्याः पृथक् शोणितनाशनः ॥69॥

(चक्रदत्त 3

वातपित्तहरं वृष्यं प्रियालं गुरुशीतलम् ॥73॥

(ध. नि. आम्रादिवर्ग

**प्रियालः कफपित्तघ्नः .... ॥395॥**

**(कै. नि. ओषधिवर्ग**

**चारः पित्तकफास्रघ्नः :.... ॥84॥**

**(भा. प्र. नि. आम्रादिवर्ग)**

# प्रियङ्गुः (फलम्)

चरके सन्धानीये पुरीषसंग्रहणीये मूत्रविरजनीये
शोणितास्थापने च महाकषाये पठ्यते ।।5,31,34,46।।
(च. सू. 4 )

गन्धप्रियङ्गुःशोणितपित्तातियोगप्रशमनानाम्। 40।।
(च. सू. 25)

अञ्जन.....प्रियङ्गु .... मधुकं चेति ।43
अञ्जनादिर्गणो ह्येष रक्तपित्तनिबर्हणः।।
विषोपशमनो दाहं निहन्त्याभ्यन्तरं भृशम् ।।20।।
(सु. सू. 38 )

गणौ प्रियङ्ग्वम्बष्ठादौ पक्वातिसारनाशनौ।
सन्धानीयौ हितौ पित्ते व्रणानां चापि रोपणौ ।।22।।
(सु. सू. 38 )

प्रियङ्गुः शीतला तिक्ता मोहदाहविनाशिनी।
ज्वरवान्तिहरा रक्तमुद्रिक्तं च प्रसादयेत् ।।16।।
(ध. नि. चन्दनादिवर्ग)

प्रियङ्गुरास्यदौर्गन्ध्यरक्तपित्तज्वरापहा ।।1331।।
(सो. नि.II)

प्रियङ्गुः शीतला वान्तिदाहपित्तज्वरास्त्रजित्।
मुखकान्तिप्रजननी गात्रदौर्गन्ध्यनाशिनी ।।
(म. पा. नि.)

तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु।
विबन्धाध्मानबलकृत् संग्राहि कफपित्तजित् ।।1356।।
(कै. नि. ओषधिवर्ग)

प्रियङ्गुः शीतला तिक्ता दाहपित्तास्त्रदोषजित्।
वान्तिभ्रान्तिज्वरहरा वक्त्रजाड्यविनाशनी ।।46।।
(रा. नि. चन्दनादिवर्ग)

तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु ।
विबन्धाध्मानबलकृत् सङ्.ग्राहि कफपित्तजित् ।।104।।
(भा. प्र. नि. कर्पूरादिवर्ग)

# पुष्करम् (मूलम्)

शटीपुष्करमूल .... कुलीरश्रृंग्य इति
दशेमानि हिक्कानिग्रहणानि भवन्ति ।।30।।
(च. सू. 4 )

शटीपुष्करमूल .... चण्डा इति
दशेमानि श्वासहराणि भवन्ति ।।37।।
(च. सू. 4

पुष्करमूलं हिक्काश्वासकासपार्श्वशूलहराणाम् ।।40।।
(च. सू. 25)

तिक्तं पुष्करमूलन्तु कटूष्णं कफवातजित्।।
ज्वरारोचककासघ्नं शोफाध्मानविनाशनम् ।।66।।
श्वासं हिक्का जयत्येव सेव्यमानं शनैः शनैः।
(ध. नि. गुडूच्यादिवर्ग)

पौष्करं पार्श्वरुक्श्वासकासहिक्काज्वरापहम् ।।137।।
(सो. नि.II)

पौष्करं कटुतिक्तोष्णं कासश्लेष्मानिलापहम् ।
ज्वरशोफारुचिश्वासहिक्कापार्श्वरुजो जयेत् ।।1322।।
(कै. नि. ओषधिवर्ग)

पौष्करं कटुतिक्तोष्णं कफवातज्वरापहम् ।
श्वासारोचककासघ्नं शोफघ्नं पाण्डुनाशनम् ।।154।।
(रा. नि. पिप्पल्यादिवर्ग)

पृष्टिपर्णी रसे स्वादुः लघूष्णाऽस्त्रत्रिदोषजित्।
कासश्वासप्रशमनी ज्वरतृड्दाहनाशिनी॥91॥

(ध. नि. गुडूच्यादिवर्ग )

पृश्निपर्णी त्रिदोषघ्नी वृष्योष्णा मधुरा सरा।
हन्ति दाहज्वरश्वासरक्तातिसारतृड्वमीः ॥48॥

(कै. नि. ओषधिवर्ग )

पृश्निपर्णी कटूष्णाम्ला तिक्तातीसारकासजित्।
वातरोगज्वरोन्मादव्रणदाहविनाशिनी ॥119॥

(रा. नि. शताह्वादिवर्ग)

पृश्निपर्णी त्रिदोषघ्नी वृष्योष्णा मधुराऽसरा।
हन्ति दाहज्वरश्वासरक्तातिसारतृड्वमीः ॥35॥

(भा. प्र. नि. गुडूच्यादिवर्ग)

# पुष्करम् (मूलम्)

शटीपुष्करमूल .... कुलीरश्रृंग्य इति
दशेमानि हिक्कानिग्रहणानि भवन्ति ॥30॥
(च. सू. 4 )

शटीपुष्करमूल .... चण्डा इति
दशेमानि श्वासहराणि भवन्ति ॥37॥
(च. सू. 4

पुष्करमूलं हिक्काश्वासकासपार्श्वशूलहराणाम् ॥40॥
(च. सू. 25)

तिक्तं पुष्करमूलन्तु कटूष्णं कफवातजित्॥
ज्वरारोचककासघ्नं शोफाध्मानविनाशनम् ॥66॥
श्वासं हिक्का जयत्येव सेव्यमानं शनैः शनैः।
(ध. नि. गुडूच्यादिवर्ग)

पौष्करं पार्श्वरुक्श्वासकासहिक्काज्वरापहम् ॥137॥
(सो. नि.II)

पौष्करं कटुतिक्तोष्णं कासश्लेष्मानिलापहम् ।
ज्वरशोफारुचिश्वासहिक्कापार्श्वरुजो जयेत् ॥1322॥
(कै. नि. ओषधिवर्ग)

पौष्करं कटुतिक्तोष्णं कफवातज्वरापहम् ।
श्वासारोचककासघ्नं शोफघ्नं पाण्डुनाशनम् ॥154॥
(रा. नि. पिप्पल्यादिवर्ग)

पौष्करं  कटुकं तिक्तमुष्णं वातकफज्वरान्।
हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलनुत् ।।174।।

(भा. प्र. नि. हरीतक्यादिवर्ग)

# सर्जः (निर्यासः)

आरनालाढके तैलं पादसर्ज रसंश्रृतम् (घृतम्-पाठा.)।
प्रभूते खजितं (मथितं-पाठा.)-
तोये ज्वरदाहार्तिनुत् (परम् पाठा.)।।122।।
(च. चि. 29)

श्रीवेष्टके सर्जरसे सरले .... व्रणधूपनम् ।।71।।
(सु. सू. 37)

कुष्ठकण्डूकृमिश्लेष्मवातपित्तरुजां जयेत् ।।
सर्जयुग्मं कषायं स्याद् वर्ण्यं रुक्षं कफापहम् ।।1141।।
(ध. नि. आम्रादिवर्ग)

सर्जः कषायो वर्ण्यश्च कफस्वेदमदकृमीन् ।
वर्ध्मविद्रधिबाधिर्ययोनिकर्णरुजाः हरेत् ।।843।।
(कै. नि. ओषधिवर्ग)

सर्जस्तु कटुतिक्तोष्णो हिमः स्निग्धोऽतिसारजित् ।
पित्तास्रदोषकुष्ठघ्नः कण्डूविस्फोटवातजित् ।।80।।
(रा. नि. प्रभद्रादिवर्ग)

अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति ।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान् ।।21।।
(भा. प्र. नि. वटादिवर्ग)

तैलं सर्जरसोद्भूतं विस्फोटव्रणनाशनम् ।
कुष्ठपामाकृमिहरं वातश्लेष्मामयापहम् ।।26।।
(भा. नि. तैलवर्ग)

# शतावरी (मूलम)

ऐन्द्री ..... अतिरसा .... अतिबला इति
दशेमानि बल्यानि भवन्ति ॥17॥

(च. चि. 4)

अमृता .... अतिरसा .... पुनर्नवा इति
दशेमानि वयःस्थापनानि भवन्ति ॥50॥

(च. चि. 4)

विदारिगन्धा .... शतावरी .... ऋषभी चेति ।
विदारिगन्धादिरयं गणः पित्तानिलापहः ।
शोषगुल्माङ्गमर्दोर्ध्वश्वासकासविनाशनः ॥4-5॥

(सु. सू. 38)

करमर्दी .... शतावरी .... इति कण्टकसंज्ञः ।
रक्तपित्तहरौ ह्येतौ शोफत्रयविनाशनौ।
सर्वमेहहरौ चैव शुक्रदोषविनाशनौ ॥74॥

(सु. सू. 38)

वातपित्तहरी वृष्या स्वादुतिक्ता शतावरी ।
महती चैव हृद्या च मेधाग्निबलवर्धिनी ॥301॥
ग्रहण्यर्शोविकारघ्नी वृष्या शीता रसायनी ।
कफपित्तहरास्तिक्तास्तस्या एवाङ्कुरा स्मृताः॥302॥

(सु. सू. 46)

शतावरी हिमा तिक्ता रसे स्वादुः क्षयास्त्रजित्।
वातपित्तहरा वृष्या रसायनवरा स्मृता ।।282।।
सहस्त्रवीर्या मेध्या तु हृद्या वृष्या रसायनी।
शीतवीर्या निहन्त्यर्शोग्रहणीनयनामयान् ।।284।।
तदङ्कुरस्त्रिदोषघ्नो लघुरर्शःक्षयापहः ।
(ध. नि. गुडूच्यादिवर्ग)

शतावरी हिमा तिक्ता स्वाद्वी गुर्वी रसायनी ।।1063।।
सुस्निग्धा शुक्रला बल्या स्तन्यमेधाग्निपुष्टिदा।
चक्षुष्या वातपित्तास्त्रगुल्मातिसारशोफजित् ।।1064।।
महाशतावरी हृद्या मेधाग्निबलशुक्रदा ।।1066।।
ग्रहण्यर्शोऽक्षिरोगघ्नी शीतवीर्या रसायनी।
तदंकुरो लघुस्तिक्तो वृष्यो हृद्यस्त्रिदोषनुत् ।।1067।।
निहन्ति वातपित्तास्त्रग्रहणीगुदजक्षयान् ।
(कै. नि. ओषधिवर्ग)

शतावर्यौ हिमे वृष्ये मधुरे पित्तजित्परे ।
कफवातहरे तिक्तो महाश्रेष्ठे रसायने ।।122।।
शतावरीद्वयं वृष्यं मधुरं पित्तजिद्धिमम्।
महती कफवातघ्नी तिक्ता श्रेष्ठा रसायने ।
कफपित्तहरास्तिक्तास्तस्या एवांकुराः स्मृताः ।।123।।
(रा. नि. शताह्वादिवर्ग)

शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी।
मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित् ।।186।।
शुक्रस्तन्यकरी बल्या वातपित्तास्रशोफजित् ।
महाशतावरी मेध्या हृद्या वृष्या रसायनी ।।187।।
शीतवीर्या निहन्त्यर्शोग्रहणीनयनामयान् ।
तदङ्.कुरस्त्रिदोषघ्नो लघुरर्शःक्षयापहा ।1188।।
(भा. प्र. नि., गुडूच्यादिवर्ग)

शिग्रुः सरः कटुःपाके तीक्ष्णोष्णो मधुरो लघुः।
दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत्।।
संग्राह्यशुक्रलो हृद्यः पित्तरक्तप्रकोपणः।।
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन्।
मेदोऽपचीविषप्लीहगुल्मकण्डूव्रणान्हरेत्।।
शिग्रुवल्कलपत्राणां स्वरसः परमार्त्तिहत् ।।109।।

(भा. प्र. नि. गुडूच्यादिवर्ग)

चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्।
अवृष्यं कफवातघ्नं तन्नस्येन शिरोर्तिनुत्।।110।।

(भा.प्र.नि. गुडूच्यादिवर्ग)

शिग्रुः सरः कटुःपाके तीक्ष्णोष्णो मधुरो लघुः।
दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत्।।
संग्राह्यशुक्रलो हृद्यः पित्तरक्तप्रकोपणः।।
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन्।
मेदोऽपचीविषप्लीहगुल्मकण्डूव्रणान्हरेत्।।
शिग्रुवल्कलपत्राणां स्वरसः परमार्त्तिहृत् ।।109।।

(भा. प्र. नि. गुडूच्यादिवर्ग)

**चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्।**
**अवृष्यं कफवातघ्नं तन्नस्येन शिरोर्तिनुत्।।110।।**

(भा.प्र.नि. गुडूच्यादिवर्ग)